*puruṣārtha-śūnyānāṃ guṇānāṃ pratiprasavaḥ kaivalyaṃ sva-rūpa-pratiṣṭhā vā citi-śaktir iti.*

[*artha-śūnya*: no more purpose; *puruṣa*: person; *guṇa*s: constituents of nature; *pratiprasava*: return to their origin. *kaivalya*: freedom. *vā*: otherwise; *iti*: known as; *śakti*: pure power; *citi*: consciousness; *pratiṣṭha*: remaining; *sva-rūpa*: its own nature.]

# Sanskrit of Endnote Quotations

**(The *sandhi*s between words are split for easier comprehension)**

# Chapter 1

[2] अथ इति अयम् अधिकार-अर्थः (=आरम्भ-अर्थः) (*Vyāsa*'s *Pātañjali Yoga Sūtrāṇi Bhāṣya* 1.1).

[3] अ-विद्या-काम-कर्म-उपादान-हेतु-निवृत्तौ स्व-आत्मनि अवस्थानं मोक्षः इति (*Taittirīya Up. Śāṅkara Bhāṣya* introduction).

[4] सुखम् आत्यन्तिकं यद् तद् बुद्धि-ग्राह्यम् अतीन्द्रियम्। वेत्ति यत्र न च एव अयं स्थितः चलति तत्त्वतः।। यं लब्ध्वा च अ-परं लाभं मन्यते न अधिकं ततः। यस्मिन् स्थितः न दुःखेन गुरुणा अपि विचाल्यते।। तं विद्यात् दुःख-संयोग-वियोगं योग-संज्ञितम् (*Bh. Gītā* 6.21 through 23).

[6] स्वयं च आत्मा ब्रह्म। तद्-विज्ञानात् अ-विद्या-निवृत्तिः इति ब्रह्म-विद्या-अर्थ-उपनिषद् आरभ्यते। उपनिषद् इति विद्या उच्यते। तद्-शीलिनां गर्भ-जन्म-जरा-आदि-निशातनात् तद्-अवसादनात् वा, ब्रह्मणः वा उपनिगमयितृत्वात्, उपनिषण्णं वा अस्यां (विद्यायां) परं श्रेयः इति (*Taittirīya Up. Śāṅkara Bhāṣya* introduction).

[7] तां योगम् इति मन्यन्ते स्थिराम् इन्द्रिय-धारणाम् (*Kaṭha Up.* 2.3.11). प्रत्याहारः तथा, ध्यानं, प्राण-आयामः अथ, धारणा, तर्कः च एव समाधिः च षड्-अङ्गः योगः उच्यते (*Amṛta-nāda Up.* 6). (मनसः) समत्वं योगः उच्यते (*Bh. Gītā* 2.48). योगः कर्मसु कौशलम् (=कुशल-भावः, यथार्थता) (*Bh. Gītā* 2.50). दुःख-संयोग-वियोगं योग-संज्ञितम् (*Bh. Gītā* 6.23).

[8] चञ्चलं हि मनः कृष्ण प्रमाथि बलवत् दृढम्। तस्य अहं निग्रहं मन्ये वायोः इव सुदुष्करम् (*Bh. Gītā* 6.34).

[10] श्रेयः च प्रेयः च मनुष्यम् आ-इतः तौ सम्परीत्य विविनक्ति धीरः। श्रेयः हि धीरः अभि प्रेयसः वृणीते प्रेयः मन्दः योग-क्षेमात् (=शरीर-आदि-उपचय-रक्षणात्) वृणीते (*Kaṭha Up.* 1.2.2).

[11] न दृष्टेः द्रष्टारं पश्येः।...एषः ते आत्मा सर्व-अन्तरः, अतः अन्यद् आर्तम् (=विनाशि) (*Bṛhad-āraṇyaka Up.* 3.4.2). सलिलः (=स्वच्छीभूतः सलिलः इव) एकः द्रष्टा अ-द्वैतः भवति, एषः ब्रह्म-लोकः सम्राट् इति (*Bṛhad-āraṇyaka Up.* 4.3.32).

[12] जाग्रत्-स्वप्न-सुषुप्ति-आदि-प्रपञ्चं यद् प्रकासते। तद् ब्रह्म अहम् इति ज्ञात्वा सर्व-बन्धैः प्रमुच्यते॥ त्रिष् धामसु यद् भोग्यं भोक्ता भोगः च यद् भवेत्। तेभ्यः वि-लक्षणः साक्षी चिन्मात्रः अहं सदा शिवः (*Kaivalya Up.* 17 and 18).

[13] सत्यं वद। धर्मं चर (*Taittirīya Up.* 1.11.1). सत्यं च अन्-ऋतं च। सत्यं अभवत्। यद् इदं किञ्च। तद् सत्यम् इति आचक्षते (*Taittirīya Up.* 2.6.1).

[14] भगवान्, कति एव देवाः प्रजां विधारयन्ते, कतरे एतत् प्रकाशयन्ते, कः पुनर् एषां वरिष्ठः इति॥ तस्मै सः होवाच आकाशः ह वै एषः देवः वायुर् अग्निः आपः पृथिवी वाक् मनस् चक्षुर् श्रोत्रं च। ते प्रकाश्य अभिवदन्ति वयम् एतत् बाणम् अवष्टभ्य विधारयामः॥ तान् वरिष्ठः प्राणः उवाच। मा मोहम् आपद्यथ, अहम् एव एतत् पञ्चधा आत्मानं प्रविभज्य एतत् बाणम् अवष्टभ्य विधारयामि इति, ते अश्रद्दधानाः बभूवुः॥ सः अभिमानात् ऊर्ध्वम् उत्क्रमते इव, तस्मिन् उत्क्रामति अथ इतरे सर्वे एव उत्क्रामन्ते, तस्मिन् च प्रतिष्ठमाने सर्वे एव प्रातिष्ठन्ते। तद्-यथा मक्षिकाः मधुकर-राजानम् उत्क्रामन्तं सर्वाः एव उत्क्रामन्ते, तस्मिन् च प्रतिष्ठमाने सर्वाः एव प्रातिष्ठन्ते, एवं वाक् मनस् चक्षुर् श्रोत्रं च ते प्रीताः प्राणं स्तुन्वन्ति (*Praśna Up.* 2.1 through 4).

[15] (अ-सतः) आगम-अपायिनः अ-नित्याः॥...न अ-सतः विद्यते भावः न अ-भावः विद्यते सतः (*Bh. Gītā* 2.14 and 16).

[16] वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरः अपराणि। तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही (*Bh. Gītā* 2.22).

[17] अस्तम् इते आदित्ये याज्ञवल्क्य, चन्द्रमसि अस्तम् इते, शान्ते अग्नौ, शान्तायां वाचि किं ज्योतिः एव अयं पुरुषः इति -- आत्मा एव अस्य ज्योतिः भवति इति, आत्मना एव अयं जोतिषा आस्ते पल्ययते (=परि-अयते) कर्म कुरुते विपल्येति (=विपरि-एति) इति (*Bṛhad-āraṇyaka Up.* 4.3.6).

[18] यद् वै तद् न पश्यति पश्यन् वै तद् न पश्यति, न हि द्रष्टुः दृष्टेः विपरिलोपः विद्यते अ-विनाशित्वात्। न तु तद् द्वितीयम् अस्ति ततः अन्यद् विभक्तं यत् पश्येत् (*Bṛhad-āraṇyaka Up.* 4.3.23).

[19] न तु एव अहं जातु न आसं न त्वं न इमे जन-अधिपाः। न च एव न भविष्यामः सर्वे वयम् अतः परम् (*Bh. Gītā* 2.12).

[20] यत्र हि द्वैतम् इव भवति तद् इतरः इतरं जिघ्रति, तद् इतरः इतरं पश्यति, तद् इतरः इतरं शृणोति, तद् इतरः इतरम् अभिवदति, तद् इतरः इतरं मनुते, तद् इतरः इतरं विजानाति। यत्र वा अस्य सर्वम् आत्मा एव अभुत् तत् केन कं जिघ्रेत्, तत् केन कं पश्येत्, तत् केन कं शृणुयात्, तत् केन कम् अभिवदेत्, तत् केन कं मन्वीत, तत् केन कं विजानीयात्। येन इदं सर्वं विजानाति तं केन विजानीयत्। विज्ञातारम् अरे केन विजानीयात् इति (*Bṛhad-āraṇyaka Up.* 2.4.14).

[21] मयि एव सकलं जातं मयि सर्वं प्रतिष्ठितम्। मयि सर्वं लयं याति तद् ब्रह्म अ-द्वयम् अस्मि अहम् (*Kaivalya Up.* 19).

[22] एषः सर्वेषु भूतेषु गूढः आत्मा न प्रकाशते (*Kaṭha Up.* 1.3.12).

[23] सद् एव सोम्य इदम् अग्रे आसीत् एकम् एव अ-द्वितीयम् (*Chāndogya Up.* 6.2.1).

[24] अ-विनाशि तु तद् विद्धि येन सर्वम् इदं ततम्। विनाशम् अ-व्ययस्य अस्य न कश्चित् कर्तुम् अर्हति (*Bh. Gītā* 2.17).

[25] चित्तम् एव हि संसारः तद् प्रयत्नेन शोधयेत्। यद्-चित्तः तद्-मयः भवति गुह्यम् एतद् सनातनम् (*Maitrāyaṇī Up.* 1.9).

[27] प्रजा-पतिः लोकान् अभ्यतपत् तेषां तप्यमानानां रसान् प्रावृहत् अग्निं पृथिव्याः वायुम् अन्तरिक्षात् आदित्यं दिवः।। सः एताः तिस्रः देवताः अभ्यतपत् तासां तप्यमानानां रसान् प्रावृहत् अग्नेः ऋचः वायोः यजूंषि सामनि आदित्यात् (*Chāndogya Up.* 4.17.1 and 2).

[28] एक-एकं जालं बहुधा विकुर्वन् अस्मिन् क्षेत्रे संहरति एषः देवः। भूयः सृष्ट्वा पतयः (=प्रजा-पतयः) तथा ईशः सर्व-आधि-पत्यं कुरुते महा-आत्मा (*Śvetāśvatara Up.* 5.3).

[29] न कर्मणा न प्रजया धनेन त्यागेन एके अ-मृतत्वम् आनशुः। परेण नाकं निहितं गुहायां विभ्राजते यद् यतयः विशन्ति।। वेदान्त-विज्ञान-सुनिश्चित-अर्थाः सन्न्यास-योगात् यतयः शुद्ध-सत्त्वाः। ते ब्रह्म-लोकेषु परान्त-काले परामृताः परिमुच्यन्ति सर्वे (*Kaivalya Up.* 3 and 4).

[30] न हि ज्ञानेन सदृशं पवित्रम् इह विद्यते। तद् स्वयं योग-संसिद्धः कालेन आत्मनि विन्दति (*Bh. Gītā* 4.38).

[31] दूरम् एते विपरीते विषूची अविद्या या च विद्या इति ज्ञाता (*Kaṭha Up.* 1.2.4).

[32] प्राण-आदिभिः अनन्तैः च भावैः एतैः विकल्पितः। माया एषा तस्य देवस्य (=जीव-आत्मनः) यया संमोहितः स्वयम् (*Māṇḍūkya Up. Kārikā* 2.19).

[33] यथा सोम्य एकेन मृत्-पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचा-आरम्भणं विकारः नामधेयं मृत्तिका इति एव सत्यम्। यथा सोम्य एकेन लोह-मणिना सर्वं लोहमयं विज्ञातं स्याद् वाचा-आरम्भणं विकारः नामधेयं लोहम् इति एव सत्यम् (*Chāndogya Up.* 6.1.4 and 5).

[34] रूपं रूपं प्रतिरूपः बभूव तद् अस्य रूपं प्रतिचक्षणाय। इन्द्रः मायाभिः पुरु-रूपः ईयते युक्ताः हि अस्य हरयः शताः दश॥ इति (*Ṛg Veda* 6.47.18)। अयं वै हरयः, अयं वै दश च सहस्राणि, बहूनि च अन्-अन्तानि च (*Bṛhad-āraṇyaka Up.* 2.5.19). स्वप्न-जागरित-स्थाने हि एकम् आहुः मनीषिणः। भेदानां हि समत्वेन प्रसिद्धेन एव हेतुना॥ आदौ अन्ते च यद् न अस्ति वर्तमाने अपि तद् तथा। वितथैः सदृशाः सन्तः अ-वितथाः इव लक्षिताः॥ स-प्रयोजनता तेषां स्वप्ने विप्रतिपद्यते। तस्मात् आदि-अन्तवत्त्वेन मिथ्या एव खलु ते स्मृताः (*Māṇḍūkya Up. Kārikā* 2.5 through 7). कल्पयति आत्मना आत्मानम् आत्मा देवः स्व-मायया। सः एव बुध्यते भेदान् इति वेदान्त-निश्चयः (*Māṇḍūkya Up. Kārikā* 2.12).

[35] योगः अस्ति…न च अति-स्वप्न-शीलस्य (*Bh. Gītā* 6.16).

[36] यत्र सुप्तः न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्त-स्थानः एकीभूतः प्रज्ञान-घनः एव आनन्दमयः हि आनन्द-भूक् चेतो-मुखः प्राज्ञः तृतीयः पादः (*Māṇḍūkya Up.* 1.5).

[37] स्व-देहम् अरणिं कृत्वा प्रणवं च उत्तर-अरणिम्। ध्यान-निर्मथन-अभ्यासाद् देवं पश्येत् निगूढवत् (*Śvetāśvatara Up.* 1.14). आत्मानम् अरणिं कृत्वा प्रणवं च उत्तर-अरणिम्। ज्ञान-निर्मथन-अभ्यासात् पापं दहति पण्डितः (*Kaivalya Up.* 11). मनः दुर्-निग्रहं चलम्। अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते (*Bh. Gītā* 6.35).

[38] अ-विद्यायां बहुधा वर्तमानाः वयं कृत-अर्थाः इति अभिमन्यन्ति बालाः। यत् कर्मिणः न प्रवेदयन्ति रागात् तेन आतुराः क्षीण-लोकाः च्यवन्ते (*Muṇḍaka Up.* 1.2.9).

[39] ध्यायतः विषयान् पुंसः सङ्गः तेषु उपजायते। सङ्गात् सञ्जायते कामः कामात् क्रोधः अभिजायते॥ क्रोधाद् भवति संमोहः संमोहात् स्मृति-विभ्रमः। स्मृति-भ्रंशाद् बुद्धि-नाशः बुद्धिनाशात् (पुमान्) प्रणश्यति (*Bh. Gītā* 2.62 and 63).

[40] याम् इमां पुष्पितां वाचं प्रवदन्ति अ-विपश्चितः। वेद-वाद-रताः पार्थ न अन्यद् अस्ति इति वादिनः। काम-आत्मानः स्वर्ग-पराः जन्म-कर्म-फल-प्रदाम्। क्रिया-विशेष-बहुलां भोग-ऐश्वर्य-गति प्रति (*Bh. Gītā* 2.42 and 43).

[41] यः च स्व-भावं पचति विश्व-योनिः पाच्यान् च सर्वान् परिणामयेत् यः। सर्वम् एतद् विश्वम् अधितिष्ठति एकः गुणान् च सर्वान् विनियोजयेत् यः॥…गुण-अन्वयः यः फल-कर्म-कर्ता कृतस्य तस्य एव सः च उपभोक्ता। सः विश्व-रूपः त्रि-गुणः त्रि-वर्त्मा प्राण-अधिपः सञ्चरति स्व-कर्मभिः (*Śvetāśvatara Up.* 5.5 and 7).

42 सः ह उवाच गार्ग्यः, यः एव असौ आदित्ये पुरुषः एतम् एव अहं ब्रह्म उपासे इति, सः ह उवाच अजातशत्रुः मा मा एतस्मिन् संवदिष्ठाः… (*Bṛhad-āraṇyaka Up.* 2.1.2… to end of the Chapter in 2.6.3). सः वै अयं पुरुषः सर्वासु पूर्षु पुरिशयः, न एनेन किंचन अन्-आवृतम् (*Bṛhad-āraṇyaka Up.* 2.5.18).

44 आगमस्य अ-विरोधेन ऊहनं तर्कः उच्यते (*Amṛta-nāda Up.* 17).

45 विज्ञानम् आनन्दं ब्रह्म, रातिः-दातुः पर-अयणम्, तिष्ठमानस्य तद्-विदः इति (*Bṛhad-āraṇyaka Up.* 3.9.28.7). एषः अस्य परमः आनन्दः, एतस्य एव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति।। …सः एकः ब्रह्म-लोके आनन्दः, यः च श्रोत्रियः अ-वृजिनः अ-काम-हतः, अथ एषः परमः आनन्दः, एषः ब्रह्म-लोकः, सम्राट् -- इति याज्ञवल्क्यः (*Bṛhad-āraṇyaka Up.* 4.3.32 and 33). सत्यं ज्ञानम् अनन्तं ब्रह्म (*Taittirīya Up.* 2.1.1). रसः वै सः। रसं हि एव अयं लब्ध्वा आनन्दी भवति (*Taittirīya Up.* 2.7.1). सः एकः ब्रह्मणः आनन्दः। श्रोत्रियस्य च अ-काम-हतस्य (*Taittirīya Up.* 2.8.1). आनन्दं ब्रह्मणः विद्वान्। न बिभेति कुतश्चन इति (*Taittirīya Up.* 2.9.1).

46 यदा वै श्रद्दधाति अथ मनुते, न अ-श्रद्दधन् मनुते, श्रद्दधद् एव मनुते, श्रद्धा तु एव विजिज्ञासितव्या इति, श्रद्धां भगवः विजिज्ञासे इति। यदा वै निस्तिष्ठति अथ श्रद्दधाति, न अ-निस्तिष्ठन् श्रद्दधाति, निस्तिष्ठन् एव श्रद्दधाति, निष्ठा (=तत्परत्वं) तु एव विजिज्ञासितव्या (*Chāndogya Up.* 7.19.1 and 20.1).

47 ब्रह्मचर्यम् अहिंसां च अपरिग्रहं च सत्यं च यत्नेन हे रक्षतः हे रक्षतः हे रक्षतः इति (*Āruṇeya Up.* 3).

48 युक्तः कर्म-फलं त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम्। अ-युक्तः काम-कारेण फले सक्तः निबध्यते (*Bh. Gītā* 5.12).

50 वीत-राग-भय-क्रोधाः मन्मयाः माम् उपाश्रिताः। बहवः ज्ञान-तपसा पूताः मद्-भावम् आगताः (*Bh. Gītā* 4.10).

51 समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्सु अ-विनश्यन्तं यः पश्यति सः पश्यति। समं पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्। न हिनस्ति आत्मना आत्मानं ततः याति परां गतिम् (*Bh. Gītā* 13.27 and 28).

52 एषः सर्वेश्वरः एषः सर्वज्ञः एषः अन्तर्यामी एषः योनिः सर्वस्य प्रभव-अप्ययौ हि भूतानाम् (*Māṇḍūkya Up.* 6).

53 इमं विवस्वते योगं प्रोक्तवान् अहम् अव्ययम् (*Bh. Gītā* 4.1).

54 पुरुषः एव इदꣳ सर्वम्। यद् भूतम् यद् च भव्यम्। उत अ-मृतत्वस्य ईषानः (*Puruṣa Sūkta*, *Ṛg Veda* 10.90.2). तद् एतद् ब्रह्म अ-पूर्वम् अन्-अपरम् अन्-अन्तम् अ-बाह्यम्, अयम् आत्मा ब्रह्म सर्व-अनुभूः इति अनुशासनम् (*Bṛhad-āraṇyaka Up.* 2.5.19).

55 (तद् परं ब्रह्म) ज्ञानं ज्ञेयं ज्ञान-गम्यं हृदि सर्वस्य विष्ठितम् (*Bh. Gītā* 13.17).

56 सः ह उवाच यद् ऊर्ध्वं गार्गि दिवः यद् अवाक् पृथिव्याः यद् अन्तरा द्यावा-पृथिवी इमे यद् भूतं च भवत् च भविष्यत् च इति आचक्षते आकाशे तद् ओतं च प्रोतं च इति (*Bṛhad-āraṇyaka Up.* 3.8.4).

57 मद्-स्थानि सर्व-भूतानि न च अहं तेषु अवस्थितः।। न च मद्-स्थानि भूतानि…भूत-भृत् न च भूत-स्थः मम आत्मा भूत-भावनः (*Bh. Gītā* 9.4 and 5).

58 प्रणवं हि ईश्वरं विद्यात् सर्वस्य हृदि संस्थितम्। सर्व-व्यापिनम् ओङ्कारं मत्वा धीरः न शोचति (*Māṇḍūkya Up. Kārikā* 1.28).

59 न अन्तः-प्रज्ञं न बहिष्-प्रज्ञं न उभयतः-प्रज्ञं न प्रज्ञान-घनं न प्रज्ञं न अ-प्रज्ञम्। अ-दृष्टम् अ-व्यवहार्यम् अ-ग्राह्यम् अ-लक्षणम् अ-चिन्त्यम् अ-व्यपदेश्यम् एक-आत्म-प्रत्यय-सारं प्रपञ्च-उपशमं शान्तं शिवम् अ-द्वैतं चतुर्थं मन्यन्ते सः आत्मा सः विज्ञेयः (*Māṇḍūkya Up.* 1.7).

61 कश्चिद् धीरः प्रत्यग्-आत्मानम् ऐक्षत् आवृत-चक्षुः अमृतम् इच्छन् (*Kaṭha Up.* 2.1.1).

62 चतुर्-विधा भजन्ते मां जनाः सुकृतिनः अर्जुन। आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च भरत-ऋषभ।। तेषां ज्ञानी नित्य-युक्तः एक-भक्तिः विशिष्यते। प्रियः हि ज्ञानिनः अत्यर्थम् अहं सः च मम प्रियः।। उदाराः सर्वे एव एते ज्ञानी तु आत्मा एव मे मतम्। आस्थितः सः हि युक्त-आत्मा माम् एव अनुत्तमां गतिम् (*Bh. Gītā* 7.16 through 18).

63 प्रशान्त-आत्मा (=प्रशान्त-मनः) विगत-भीः ब्रह्म-चारि-व्रते स्थितः। मनः संयम्य मद्-चित्तः युक्तः आसीत मद्-परः (*Bh. Gītā* 6.14).

64 ब्रह्म-विद् आप्नोति परम्।…सत्यं ज्ञानम् अनन्तं ब्रह्म्। यः वेद निहितं गुहायां परमे व्योमन् (=परमे व्योम्नि)। सः अश्नुते सर्वान् कामान् सह (*Taittirīya Up.* 2.1.1). तत् (ब्रह्मन्) त्वम् असि (*Chāndogya Up.* 6.8.7…). तद् इदम् अपि एतर्हि यः एवं वेद, अहं ब्रह्म अस्मि इति, सः इदं सर्वं भवति (*Bṛhad-āraṇyaka Up.* 1.4.10).

65 प्राणान् प्रपीड्य इह संयुक्त-चेष्टः क्षीणे प्राणे नासिकया उच्छ्वसीत। दुष्ट-अश्व-युक्तम् इव वाहम् एनं विद्वान् मनः धारयेत अप्रमत्तः (*Śvetāśvatara Up.* 2.9).

66 अथ यद् अतः परः (=परं) दिवः ज्योतिः दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अन्-उत्तमेषु उत्तमेषु लोकेषु इदं वाव तद् यद् इदम् अस्मिन् अन्तः पुरुषे ज्योतिः (*Chāndogya Up.* 3.13.7). ज्योतिषाम् अपि तद् ज्योतिः तमसः परम् उच्यते (*Bh. Gītā* 13.17).

[67] न अस्य (देहस्य) जरया एतद् (अन्तर्-आकाशः ब्रह्म) जीर्यति, न वधेन अस्य हन्यते, एतत् सत्यं ब्रह्म-पुरम्, अस्मिन् कामाः समाहिताः, एषः आत्मा अपहत-पाप्मा वि-जरः वि-मृत्युः वि-शोकः वि-जिघत्सः अ-पिपासः सत्य-कामः सत्य-संकल्पः (*Chāndogya Up.* 8.1.5). हृद्-पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् (*Kaivalya Up.* 5).

[68] संप्राप्य एनम् ऋषयः ज्ञान-तृप्ताः कृत-आत्मानः वीत-रागाः प्रशान्ताः। ते सर्व-गं सर्वतः प्राप्य धीराः युक्त-आत्मानः सर्वम् एव आविशन्ति (*Muṇḍaka Up.* 3.2.5).

[70] सर्वे वेदाः यत् पदम् आमनन्ति तपांसि सर्वाणि च यद् वदन्ति। यद् इच्छन्तः ब्रह्म-चर्यं चरन्ति तत् ते पदं संग्रहेण ब्रवीमि ओम् इति एतत्॥…एतद् आलम्बनं श्रेष्ठम् एतद् आलम्बनं परम्। एतद् आलम्बनं ज्ञात्वा ब्रह्म-लोके महीयते (*Kaṭha Up.* 1.2.15 and 17).

[71] न नरेण अ-वरेण प्रोक्तः एषः सु-विज्ञेयः बहुधा चिन्त्यमानः। अन्-अन्य-प्रोक्ते गतिः अत्र न अस्ति (*Kaṭha Up.* 1.2.8).

[72] तस्य वै एतस्य पुरुषस्य द्वे एव स्थाने भवतः, इदं च पर-लोक-स्थानं च, सन्ध्यं तृतीयं स्वप्न-स्थानं, तस्मिन् सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यति इदं च पर-लोक-स्थानं च। अथ यथा-आक्रमः अयं पर-लोक-स्थाने भवति तम् आक्रमम् आक्रम्य उभयान् पाप्मनः आनन्दान् च पश्यति, सः यत्र प्रस्वपिति, अस्य लोकस्य सर्व-अवतः मात्राम् अपादाय स्वयं विहत्य, स्वयं निर्माय, स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति, अत्र अयं पुरुषः स्वयं ज्योतिः भवति (*Bṛhad-āraṇyaka Up.* 4.3.9).

[73] यः तु आत्म-रतिः एव स्याद् आत्म-तृप्तः च मानवः। आत्मनि एव च संतुष्टः तस्य कार्यं न विद्यते॥ न एव तस्य कृतेन अर्थः न अ-कृतेन इह कश्चन। न च अस्य सर्व-भूतेषु कश्चिद् अर्थ-व्यपाश्रयः (*Bh. Gītā* 3.17 and 18).

[74] अर्जुनः उवाच। पश्यामि देवान् तव देव देहे सर्वान् तथा भूत-विशेष-सङ्घान्। ब्रह्माणम् ईशं कमल-आसन-स्थम् ऋषीन् च सर्वान् उर-गान् च दिव्यान्॥ अन्-एक-बाहु-उदर-वक्त्र-नेत्रं पश्यामि त्वां सर्वतः अन्-अन्त-रूपम्। न अन्तं न मध्यं न पुनः तव आदिं पश्यामि विश्व-ईश्वर विश्व-रूप… (*Bh. Gītā* 11.15 and 16).

[75] बृहत् च तद् दिव्यम् अ-चिन्त्य-रूपं सूक्ष्मात् च तत् सूक्ष्मतरं विभाति। दूरात् सु-दूरे तद् इह अन्तिके च पश्यत्सु इह एव निहितं गुहायाम् (*Muṇḍaka Up.* 3.1.7).

[76] माया तु प्रकृतिं विद्यात् मायिनं च महेश्वरम् (*Śvetāśvatara Up.* 4.10). दैवी हि एषा गुणमयी मम माया दुर्-अत्यया। माम् एव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते (*Bh. Gītā* 7.14).

[77] यद् एव साक्षाद्-अ-परोक्षाद्-ब्रह्म…एषः ते आत्मा सर्व-अन्तरः।…न दृष्टेः द्रष्टारं पश्येः, न श्रुतेः श्रोतारं शृणुयात्, न मतेः मन्तारं मन्वीथाः, न विज्ञातेः विज्ञातारं विजानीयाः (*Bṛhad-āraṇyaka Up.* 3.4.2).

[78] ये तु एतद् अभ्यसूयन्तः न अनुतिष्ठन्ति मे मतम् (=अनुशासनम्)। सर्व-ज्ञान-विमूढान् तान् विद्धि नष्टान् अ-चेतसः (*Bh. Gītā* 3.32).

[79] द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्म-विदः वदन्ति परा च एव अ-परा च॥ तत्र अ-परा ऋग्-वेदः यजुर्-वेदः साम-वेदः अथर्व-वेदः शिक्षा कल्पः व्याकरणं निरुक्तं छन्दस् ज्योतिष्म् इति। अथ परा यया तद् अक्षरम् अधिगम्यते (*Muṇḍaka Up.* 1.1.4 and 5).

[80] यावान् अर्थः उद-पाने सर्वतः सम्प्लुत-उदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः (*Bh. Gītā* 2.46).

[81] राग-द्वेष-वियुक्तैः तु विषयान् इन्द्रियैः चरन्। आत्म-वश्यैः विधेय-आत्मा (=विधेय-चित्तः) प्रसादम् अधिगच्छति॥ प्रसादे सर्व-दुःखानां हानिः अस्य उपजायते। प्रसन्न-चेतसः हि आशु बुद्धिः पर्यवतिष्ठते (*Bh. Gītā* 2.64 and 65).

[82] अथ अतः आदेशः -- नेति नेति (=न इति न इति) (*Bṛhad-āraṇyaka Up.* 2.3.6). सः एषः नेति नेति आत्मा, अ-गृह्यः न हि गृह्यते,… (*Bṛhad-āraṇyaka Up.* 3.9.26, 4.2.4, 4.4.22 and 4.5.15).

[83] न अयम् आत्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन। यम् एव एषः वृणुते तेन लभ्यः तस्य एषः आत्मा विवृणुते तनूः स्वाम् (*Kaṭha Up.* 1.2.23, *Muṇḍaka Up.* 3.2.3).

[84] अन्-एजत् एकं मनसः जवीयः न एनद् देवाः आप्नुवन् पूर्वम् अर्षत् (*Īśā Up.* 4). यतः वाचः निवर्तन्ते। अ-प्राप्य मनसा सह। आनन्दं ब्रह्मणः विद्वान्। न बिभेति कुतश्चन इति (*Taittirīya Up.* 2.9.1). न चक्षुषा गृह्यते न अपि वाचा न अन्यैः देवैः तपसा कर्मणा वा (*Muṇḍaka Up.* 3.1.8). न तत्र चक्षुः गच्छति न वाक् गच्छति न उ मनः।…यद् वाचा अन्-अभ्युदितं येन वाक् अभ्युद्यते। तद् एव ब्रह्म त्वं विद्धि न इदं यद् इदम् उपासते (*Kena Up.* 1.3 and 5). श्रवणाय अपि बहुभिः यः न लभ्यः शृण्वन्तः अपि बहुवः यं न विद्युः (*Kaṭha Up.* 1.2.7). न एषा तर्केण मतिः आपनेया (*Kaṭha Up.* 1.2.9). श्रुत्वा अपि एनं वेद न च एव कश्चित् (*Bh. Gītā* 2.29).

[85] आत्मा वै, अरे, द्रष्टव्यः — श्रोतव्यः मन्तव्यः निदिध्यासितव्यः, मैत्रेयि (*Bṛhad-āraṇyaka Up.* 2.4.5 also 4.5.6).

[86] बहु-जन्म-दृढ-अभ्यासात् देह-आदिषु आत्म-धीः क्षणात्। पुनः पुनः उदेति एवं जगत्-सत्यत्व-धीः अपि॥ विपरीता भावना इयं ऐक-अग्र्यात् सा निवर्तते। तत्त्व-उपदेशात् प्राक् एव भवति एतद् उपासनात्॥ उपास्तयः अतः एव अत्र ब्रह्म-शास्त्रे अपि चिन्तिताः। प्राक् अन्-अभ्यासिनः पश्चात् ब्रह्म-अभ्यासेन तद् भवेत् (*Pañca-Daśī* 7.103 through 105).

[87] यत्र उपरमते चित्तं निरुद्धं योग-सेवया। यत्र च एव आत्मना (=मनसा) आत्मानं पश्यन् आत्मनि तुष्यति (*Bh. Gītā* 6.20).

88 वेद अहम् एतं पुरुषं महान्तम् आदित्य-वर्णं तमसः परस्तात्। तम् एव विदित्वा अति मृत्युम् एति न अन्यः पन्था विद्यते अयनाय (*Śvetāśvatara Up.* 3.8).

# Chapter 2

[89] देव-द्विज-गुरु-प्राज्ञ-पूजनं शौचम् आर्जवम्। ब्रह्म-चर्यम् अ-हिंसा च शारीरं तपः उच्यते।। अन्-उद्वेगकरं वाक्यं सत्यं प्रिय-हितं च यत्। स्व-अध्याय-अभ्यसनं च एव वाङ्मयं तपः उच्यते।। मनः-प्रसादः सौम्यत्वं मौनम् आत्म-विनिग्रहः। भाव-संशुद्धिः इति एतत् तपः मानसम् उच्यते।। श्रद्धया परया तप्तं तपः तत् त्रिविधं नरैः। अ-फल-अ-काङ्क्षिभिः युक्तैः सात्त्विकं परिचक्षते (*Bh. Gītā* 17.14 through 17).

[90] आचार्य-कुलात् वेदम् अधीत्य यथा-विधानं गुरोः कर्म-अतिशेषेण अभिसमावृत्य कुटुम्बे (=गार्हस्थ्ये) शुचौ देशे स्वाध्यायम् अधीयानः… (*Chāndogya Up.* 8.15.1).

[91] सततं कीर्तयन्तः मां यतन्तः च दृढ-व्रताः। नमस्यन्तः च मां भक्त्या नित्य-युक्ताः उपासते (*Bh. Gītā* 9.14).

[92] त्रयः धर्म-स्कन्धाः यज्ञः अध्ययनं दानम् इति प्रथमः, तपः एव द्वितीयः, ब्रह्म-चारी आचार्य-कुल-वासी तृतीयः अत्यन्तम् आत्मानम् आचार्य-कुले अवसादयन् सर्वे एते पुण्य-लोकाः भवन्ति, ब्रह्म-सꣳस्थः अमृतत्वम् एति (*Chāndogya Up.* 2.23.1).

[93] सिद्धिं प्राप्तः यथा ब्रह्म तथा आप्नोति निबोध मे। समासेन एव कौन्तेय निष्ठा ज्ञानस्य या परा।। बुद्ध्या विशुद्धया युक्तः धृत्या आत्मानं नियम्य च। शब्द-आदीन् विषयान् त्यक्त्वा राग-द्वेषौ व्युदस्य च।। विविक्त-सेवी लघु-आशी यत-वाक्-काय-मानसः। ध्यान-योग-परः नित्यं वैराग्यं समुपाश्रितः।। अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्-ममः शान्तः ब्रह्म-भूयाय कल्पते।। ब्रह्म-भूतः प्रसन्न-आत्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्-भक्तिः लभते पराम्।। भक्त्या माम् अभिजानाति यावान् यः च अस्मि तत्त्वतः। ततः मां तत्त्वतः ज्ञात्वा विशते तद्-अन्-अन्तरम् (*Bh. Gītā* 18.50 through 55).

[95] इह एव सन्तः अथ विद्मः तद् (ब्रह्म) वयम्, न चेद् अ-वेदिः महती विनष्टिः। ये तद् विदुः अ-मृताः ते भवन्ति, अथ इतरे दुःखम् एव अपियन्ति (*Bṛhad-āraṇyaka Up.* 4.4.14).

[96] रजस् तमस् च अभिभूय सत्त्वं भवति भारत। रजस् सत्त्वं तमस् च एव तमस् सत्त्वं रजस् तथा (*Bh. Gītā* 14.10).

[97] अ-शोच्यान् अन्वशोचः त्वं प्रज्ञा-वादान् च भाषसे। गत-असून् अ-गत-असून् च न अनुशोचन्ति पण्डिताः (*Bh. Gītā* 2.11). मात्रा-स्पर्शाः तु कौतेय शीत-उष्ण-सुख-दुःख-दाः। आगम-अपायिनः अ-नित्याः तान् तितिक्षस्व भारत (*Bh. Gītā* 2.14).

[98] अथ च एनं नित्य-जातं नित्यं वा मन्यसे मृतम्। तथा अपि त्वं महा-बाहो न एवं शोचितुम् अर्हसि॥ जातस्य हि ध्रुवः मृत्युः ध्रुवं जन्म मृतस्य च। तस्मात् अ-परिहार्ये अर्थे न त्वं शोचितुम् अर्हसि॥ अ-व्यक्त-आदीनि भूतानि व्यक्त-मध्यानि भारत। अ-व्यक्त-निधनानि एव तत्र का परिदेवना (*Bh. Gītā* 2.26 through 28).

[99] विषयाः विनिवर्तन्ते निर्-आहारस्य देहिनः। रस-वर्जं रसः अपि अस्य परं दृष्ट्वा निवर्तते (*Bh. Gītā* 2.59). कर्म-इन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन्। इन्द्रिय-अर्थान् विमूढ-आत्मा मिथ्या-आचारः सः उच्यते (*Bh. Gītā* 3.6).

[100] यावत् सञ्जायते किञ्चित् सत्त्वं स्थावर-जङ्गमम्। क्षेत्र-क्षेत्रज्ञ-संयोगात् तद् विद्धि भरत-ऋषभ (*Bh. Gītā* 13.26).

[101] सर्व-इन्द्रिय-गुण-आभासं सर्व-इन्द्रिय-विवर्जितम्। अ-सक्तं सर्व-भृत् च एव निर्-गुणं गुण-भोक्तृ च (*Bh. Gītā* 13.14). प्रकाशं च प्रवृत्तिं च मोहम् एव पाण्डव। न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति॥ उदासीनवद् आसीनः गुणैः यः न विचाल्यते। गुणाः वर्तन्ते इति एव यः अवतिष्ठति न इङ्गते॥ सम-दुःख-सुखः स्वस्थः सम-लोष्ट-अश्म-काञ्चनः। तुल्य-प्रिय-अ-प्रियः धीरः तुल्य-निन्दा-आत्म-संस्तुतिः॥ मान-अपमानयोः तुल्यः तुल्यः मित्र-अरि-पक्षयोः। सर्व-आरम्भ-परित्यागी गुण-अतीतः सः उच्यते (*Bh. Gītā* 14.22 through 25).

[102] इन्द्रियेभ्यः पराः हि अर्थाः अर्थेभ्यः च परं मनः। मनसः तु परा बुद्धिः बुद्धेः आत्मा महान् (=महत्) परः॥ महतः परम् अ-व्यक्तम् (=प्रकृतिः, अ-लिङ्गम्) अ-व्यक्तात् पुरुषः परः। पुरुषात् न परं किञ्चित् सा काष्ठा सा परा गतिः (*Kaṭha Up.* 1.3.10 and 11).

[103] यथा एव बिम्बं मृदया उपलिप्तं तेजोमयं भ्राजते तत् सुधान्तम् (=सुधौतम्)। तद् वा आत्म-तत्त्वं प्रसमीक्ष्य देही एकः कृत-अर्थः भवते वीत-शोकः (*Śvetāśvatara Up.* 2.14). इति गुह्यतमं शास्त्रम् इदम् उक्तं मया अन्-अघ। एतद् बुद्ध्वा बुद्धिमान् स्यात् कृत-कृत्यः च भारत (*Bh. Gītā* 15.20).

[104] नष्टः मोहः स्मृतिः लब्धा त्वद्-प्रसादात् मया अच्युत (*Bh. Gītā* 18.73).

[105] सत्यं ज्ञानम् अनन्तं ब्रह्म (*Taittirīya Up.* 2.1.1).

[106] अनेन (ब्रह्म-विद्यया) ज्ञानम् आप्नोति संसार-अर्णव-नाशम्। तस्माद् एवं विदित्वा एनं कैवल्यं पदम् अश्नुते (*Kaivalya Up.* 24).

108 यथा सोम्य पुरुषं गन्धारेभ्यः अभिनद्ध-अक्षम् आनीय तं ततः अति-जने विसृजेत् सः यथ तत्र प्राङ् वा उदङ् वा अधराङ् वा प्रत्यङ् वा प्रध्मायीत 'अभिनद्ध-अक्षः आनीतः अभिनद्ध-अक्षः विसृष्टः'।। तस्य यथा अभिनहनं प्रमुच्य प्रब्रूयात् 'एतां दिशं गन्धाराः एतां दिशं व्रज' इति सः ग्रामात् ग्रामं पृच्छन् पण्डितः मेधावी गन्धारान् एव उपसंपदेत एवम् एव इह आचार्यवान् पुरुषः वेद तस्य तावद् एव चिरं यातद् न विमोक्ष्ये अथ संपत्स्ये इति।। सः यः एषः अणिमा ऐतद्-आत्म्यम् इदं सर्वं तत् सत्यं सः आत्मा तत् त्वम् असि श्वेतकेतो इति (*Chāndogya Up.* 6.14.1 through 3). परीक्ष्य लोकान् कर्म-चितान् ब्राह्मणः निर्वेदम् आयान् न अस्ति अ-कृतः कृतेन। तद्-विज्ञान-अर्थं सः गुरुम् एव अभिगच्छेत् समित्-पाणिः श्रोत्रियं ब्रह्म-निष्ठम् (*Muṇḍaka Up.* 1.2.12).

109 तद् यथा — परिज्ञातं हेयं न अस्य पुनः परिज्ञेयम् अस्ति। क्षीणाः हेय-हेतवः न पुनर् एतेषां क्षेतव्यम् अस्ति। साक्षात्-कृतं निरोध-समाधिना हानम्। भावितः विवेक-ख्याति-रूपः हान-उपायः।…चरित-अधिकारा बुद्धिः। गुणाः गिरि-शिखर-कूट-च्युताः इव ग्रावाणः निरवस्थानाः स्व-कारणे प्रलय-अभिमुखाः सह तेन अस्तं गच्छन्ति, न च एषां विप्रलीनानां पुनर् अस्ति उत्पादः प्रयोजन-अभावात् इति। एतस्यां अवस्थायां गुण-सम्बन्ध-अतीतः स्व-रूपमात्र-ज्योतिः अ-मलः केवली पुरुषः इति (*Vyāsa*'s *Pātañjali Yoga Sūtrāṇi Bhāṣya* 2.27).

110 लोके अस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया अन्-अघ। ज्ञान-योगन साङ्ख्यानां कर्म-योगेन योगिनाम् (*Bh. Gītā* 3.3). सन्न्यासः कर्म-योगः च निःश्रेयस-करौ उभौ (*Bh. Gītā* 5.2).

111 श्वेतकेतुः ह आरुणेयः आस तं ह पिता उवाच श्वेतकेतो वस ब्रह्म-चर्यम्। न वै सोम्य अस्मत् कुलीनः अन्-अनूच्य ब्रह्म-बन्धुः इव भवति इति।। सः ह द्वा-दश-वर्षः उपेत्य चतुर्-विंशति-वर्षः सर्वान् वेदान् अधीत्य…एयाय (*Chāndogya Up.* 6.1.1 and 2).

112 अ-सक्तिः अन्-अभिष्वङ्गः पुत्र-दार-गृह-आदिषु। नित्यं च सम-चित्तत्वम् इष्ट-अन्-इष्ट-उपपत्तिषु।।…एतद् ज्ञानम् इति प्रोक्तम् अ-ज्ञानं यद् अतः अन्यथा (*Bh. Gītā* 13.9 and 11).

113 …केन भगवन् (प्रजापते) कर्माणि अ-शेषतः विसृजानि इति। तं (आरुणिं) ह उवाच प्रजापतिः तव पुत्रान् भ्रातॄन् बन्धु-आदीन् शिखां यज्ञ-उपवीतं यागं सूत्रं स्वाध्यायं च भूलोक-भुवलोक-स्वर्लोक-महर्लोक-जनोलोक-तपोलोक-सत्यलोकं च अतल-तलातल-वितल-सुतल-रसातल-महातल-पातालं ब्रह्माण्डं च विसृजेत्।…सन्धिं समाधौ आत्मनि आचरेत्। सर्वेषु वेदेषु आरण्यकम् आवर्तयेत् उपनिषदम् आवर्तयेत् उपनिषदम् आवर्तयेत् इति।…ब्रह्म-चर्यम् अहिंसां च अपरिग्रहं च सत्यं च यत्नेन हे रक्षतः हे रक्षतः हे रक्षतः इति (*Āruṇeya Up.* 1 through 3).

114 अन्-उद्वेगकरं वाक्यं सत्यं प्रिय-हितं च (*Bh. Gītā* 17.15).

115 यः तु आत्म-रतिः एव स्यात् आत्म-तृप्तः च मानवः। आम्तनि एव च सन्तुष्टः तस्य कार्यं न विद्यते (*Bh. Gītā* 3.17).

116 सः एव काले भुवनस्य गोप्ता विश्व-अधिपः सर्व-भूतेषु गूढः। यस्मिन् युक्ताः ब्रह्म-ऋषयः देवताः च तम् एवं ज्ञात्वा मृत्यु-पाशान् छिनत्ति (*Śvetāśvatara Up.* 4.15).

117 तम् एव शरणं गच्छ सर्व-भावेन भारत। तत्-प्रसादात् परां शान्तिं स्थानं प्राप्स्यति शाश्वतम् (*Bh. Gītā* 18.62).

118 स्पर्शान् कृत्वा बहिः बाह्यान् चक्षुः च एव अन्तरे भ्रुवोः। प्राण-अपानौ समौ कृत्वा नासा-अभ्यन्तर-चारिणौ।। यत-इन्द्रिय-मनो-बुद्धिः मुनिः मोक्ष-पर-अयणः। विगत-इच्छा-भय-क्रोधः यः सदा मुक्तः एव सः (*Bh. Gītā* 5.27 and 28). शुचौ देशे प्रतिष्ठाप्य स्थिरम् आसनम् आत्मनः। न अति-उच्छ्रितं न अतिनीचं चैल-अजिन-कुश-उत्तरम्।। तत्र एक-अग्रं मनः कृत्वा यत-चित्त-इन्द्रिय-क्रियः। उपविश्य आसने युञ्ज्यात् योगम् आत्म-विशुद्धये।। समं काय-शिरो-ग्रीवं धारयन् अ-चलं स्थिरः। संप्रेक्ष्य नासिका-अग्रं स्वं दिशः च अन्-अवलोकयन्।। प्रशान्त-आत्मा विगत-भीः ब्रह्म-चारि-व्रते स्थितः। मनः संयम्य मद्-चित्तः युक्तः आसीत मद्-परः (*Bh. Gītā* 6.11 through 14).

119 यः तु अ-विज्ञानवान् भवति अ-युक्तेन मनसा सदा। तस्य इन्द्रियाणि अ-वश्यानि दुष्ट-अश्वाः इव सारथेः।। यः तु विज्ञानवान् भवति युक्तेन मनसा सदा। तस्य इन्द्रियाणि वश्यानि सद्-अश्वाः इव सारथेः (*Kaṭha Up.* 1.3.5 and 6). राग-द्वेष-वियुक्तैः तु विषयान् इन्द्रियैः चरन्। आत्म-वश्यैः (=बुद्धि-वश्यैः) वेधेय-आत्मा (=विधेय-अन्तःकरणः) प्रसादम् अधिगच्छति (*Bh. Gītā* 2.64).

120 इन्द्रियाणां हि चरतां यद् मनः अनुविधीयते। तद् अस्य हरति प्रज्ञां वायुः नावम् इव अम्भसि (*Bh. Gītā* 2.67).

# Chapter 3

121 यतः यतः निश्चरति मनः चञ्चलम् अ-स्थिरम्। ततः ततः नियम्य एतद् आत्मनि एव वशं नयेत् (*Bh. Gītā* 6.26).

122 तैल-धाराम् इव (*Dhyāna-bindū Up.* 18).

123 यज्ञानां जप-यज्ञः अस्मि (*Bh. Gītā* 10.25).

124 तस्य ह वै एतस्य एवं पश्यत एवं मन्वानस्य एवं विजानतः -- आत्मतः प्राणः, आत्मतः आशा, आत्मतः स्मरः, आत्मतः आकाशः, आत्मतः तेजः, आत्मतः आपः, आत्मतः आविर्-भाव-तिरो-भावौ, आत्मतः अन्नम्, आत्मतः बलम्, आत्मतः विज्ञानम्, आत्मतः ध्यानम्, आत्मतः चित्तम्, आत्मतः सङ्कल्पः, आत्मतः मनः, आत्मतः वाक्, आत्मतः नाम, आत्मतः मन्त्राः, आत्मतः कर्माणि, आत्मतः एव इदं सर्वम् इति।। तद् एषः श्लोकः -- न पश्यः मृत्युं पश्यति, न रोगं, न उत दुःखतां, सर्वं ह पश्यः पश्यति, सर्वम् आप्नोति सर्वशः इति (*Chāndogya Up.* 7.26.1 and 2).

126 न निरोधः न च उत्पत्तिः न बद्धः न च साधकः। न मुमुक्षा न मुक्तिः च इति एषा परम-अर्थता (*Brahma-bindu Up.* 10, *Māṇḍūkya Up. Kārikā* 2.32).

128 मन-आदिः च प्राण-आदिः च इच्छा-आदिः च सत्त्व-आदिः च पुण्य-आदिः च एते पञ्च-वर्गाः इति, एतेषां पञ्च-वर्गाणां धर्मी भूत-आत्म-ज्ञानात् ऋते न विनश्यति, आत्म-सन्निधौ नित्यत्वेन प्रतीयमानः आत्म-उपाधिः यः तद् लिङ्ग-शरीरं हृद्-ग्रन्थिः इति उच्यते। तत्र यद् प्रकाशते चैतन्यं सः क्षेत्र-ज्ञः इति उच्यते (*Sarva-sāra Up.* 16, or 7 and 8 by a different numbering).

129 सु-अल्प-अक्षरम् अ-सन्दिग्धं सारवत् विश्वतो-मुखम्। अ-स्तोभम् अन्-अ-वद्यं च सूत्रं सूत्र-विदः विदुः (*Śabda-Stoma-Mahānidhi*: A Sanskrit Dictionary by *Tārānātha Bhaṭṭāchārya*).

131 तत्र यथा तटाक-उदकं छिद्रात् निर्गत्य कुल्या-आत्मना केदारान् प्रविश्य तद्वत् एव चतुर्-कोण-आदि-आकारं भवति तथा तैजसम् अन्तःकरणम् अपि चक्षुर्-आदि-द्वारा निर्गत्य घट-आदि-विषय-देशं गत्वा घट-आदि-विषय-आकारेण परिणमते। सः एव परिणामः वृत्तिः इति उच्यते (*Vedānta-paribhāṣā* 1.18).

132 तत् स॑वि॒तुर् वरे॑ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि। धियो॒ यो नः॑ प्रचो॒दया॑त् (*Gāyatrī Mantra*, *Ṛg Veda* 3.62.10).

133 आदित्यं गच्छति एतद् वै खलु लोक-द्वारम् (*Chāndogya Up.* 8.6.5 and 6). हिरण्मयेन पात्रेण सत्यस्य अपिहितं मुखम्। तद् त्वं पूषन् अपावृणु सत्य-धर्माय दृष्टये (*Bṛhad-āraṇyaka Up.* 5.15.1).

134 ते ये एवम् एतद् विदुः, ये च अमी अरण्ये श्रद्धां सत्यम् उपास्ते, ते अर्चिः अभिसंभवन्ति, अर्चिषः अहः, अह्नः आपूर्यमाण-पक्षम्, आपूर्यमाण-पक्षात् यान् षण्मासान् उदन् आदित्यः एति, मासेभः देव-लोकम्, देव-लोकात् आदित्यम्, आदित्याद् वैद्युतम्, तान् वैद्युतात् पुरुषः मानसः एत्य ब्रह्म-लोकान् गमयति, ते तेषु ब्रह्म-लोकेषु पराः परावतः वसन्ति, तेषां न पुनर्-आवृत्तिः (*Bṛhad-āraṇyaka Up.* 6.2.15).

135 अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूमम् अभिसंभवन्ति, धूमात् रात्रिम्, रात्रेः अपक्षीयमाण-पक्षम्, अपक्षीयमाण-पक्षात् षण्मासान् दक्षिण-आदित्यः एति, मासेभ्यः पितृ-लोकम्, पितृ-लोकात् चन्द्रम्, ते चन्द्रं प्राप्य अन्नं भवन्ति, तान् तत्र देवाः यथा सोमं राजानम् आप्यायस्व अपक्षीयस्व इति, एवम् एनान् तत्र भक्षयन्ति, तेषां यदा तद् पर्यवैति अथ इमम् एव आकाशम् अभिनिष्पद्यन्ते, आकाशात् वायुम्, वायोः वृष्टिम्, वृष्टेः पृथिवीम्, ते पृथिवीं प्राप्य अन्नं भवन्ति, ते पुनः पुरुष-अग्नौ हूयन्ते, ततः योषा-अग्नौ जायन्ते, लोकान् प्रति उत्थायिनः ते एवम् एव अनुपरिवर्तन्ते, अथ ये एतौ पन्थानौ न विदुः ते कीटाः पतङ्गाः यद् इदं दन्दशूकम् (*Bṛhad-āraṇyaka Up.* 6.2.16).

138 अथ यत्र एतद् अस्मात् शरीरात् उत्क्रामति अथ एतैः एव रशिमभिः ऊर्ध्वम् आक्रमते सः ओम् इति वा ह उद् वा मीयते सः यावत् क्षिप्येन् मनः तावत् आदित्यं गच्छति एतद् वै खलु लोक-द्वारं विदुषां प्रपदनं, निरोधः अ-विदुषाम्।। तद् एषः श्लोकः। शतं च एका च हृदयस्य नाड्यः तासां मूर्धानम् अभिनिःसृता एका। तया ऊर्ध्वम् आयन् अ-मृतत्वम् एति विष्वन् अन्याः उत्क्रमणे भवन्ति उत्क्रमणे भवन्ति (*Chāndogya Up.* 8.6.5 and 6, and *Kaṭha Up.* 2.3.16). सर्व-द्वाराणि संयम्य मनः हृदि निरुध्य च। मूर्ध्नि आधाय आत्मनः प्राण्म् आस्थितः योग-धारणाम्।। ओम् इति एक-अक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन्। यः प्रयाति त्यजन् देहं सः याति परां गतिम् (*Bh. Gītā* 8.12 and 13).

139 यः एव असौ आदित्ये पुरुषः…अतिष्ठाः सर्वेषां भूतानां मूर्धा राजा इति वा अहम् एतम् उपास इति, सः यः एतम् एवम् उपास्ते अति-ष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति (*Bṛhad-āraṇyaka Up.* 2.1.2).

140 शौनकः ह वै महा-शालः अङ्गिरसं विधिवत् उपसन्नः पप्रच्छ। कस्मिन् उ भगवः विज्ञाते सर्वम् इदं विज्ञातं भवति इति (*Muṇḍaka Up.* 1.1.3).

141 यावान् वै अयम् आकाशः तावान् एषः अन्तर्-हृदयः आकाशः उभे अस्मिन् द्यावा-पृथिवी अन्तर् एव समाहिते उभौ अग्निः च वायुः च सूर्या-चन्द्रमसौ उभौ विद्युत्-नक्षत्राणि यद् च अस्य इह अस्ति यद् च न अस्ति सर्वं तद् अस्मिन् समाहितम् इति (*Chāndogya Up.* 8.1.3).

[142] तत्र सत्त्वं निर्-मलत्वात् प्रकाशकम् अन्-आमयम्। सुख-सङ्गेन बध्नाति ज्ञान-सङ्गेन च अन्-अघ।।रजः राग-आत्मकं विद्धि तृष्णा-सङ्ग-समुद्भवम्। तद् निबध्नाति कौन्तेय कर्म-सङ्गेन देहिनम्।। तमः तु अ-ज्ञान-जं विद्धि मोहनं सर्व-देहिनाम्। प्रमाद-आलस्य-निद्राभिः तद् निबध्नाति भारत (*Bh. Gītā* 14.6 through 8). न अन्यं गुणेभ्यः कर्तारं यदा द्रष्टा अनुपश्यति। गुणेभ्यः च परं वेत्ति मद्-भावं सः अधिगच्छति (*Bh. Gītā* 14.19).

[144] तद्-विज्ञान-अर्थं सः गुरुम् एव अभिगच्छेत् समित्-पाणिः श्रोत्रियं ब्रह्म-निष्ठम् (*Muṇḍaka Up.* 1.2.12). अन्-अन्य-प्रोक्ते गतिः अत्र न अस्ति अणीयान् हि अ-तर्क्यम् अणु-प्रमाणात् (*Kaṭha Up.* 1.2.8).

[145] वेद अहम् एतं पुरुषं महान्तम् आदित्य-वर्णं तमसः परस्तात्। तम् एव विदित्वा अति-मृत्युम् एति न अन्यः पन्थाः विद्यते अयनाय (*Śvetāśvatara Up.* 3.8).

[146] सः यः एवं वेद प्रतितिष्ठति। अन्नवान् अन्न-अदः भवति। महान् भवति प्रजया पशुभिः ब्रह्म-वर्चसेन। महान् कीर्त्या (*Taittirīya Up.* 3.6.1).

[147] पार्थ न एव इह न अमुत्र विनाशः तस्य विद्यते। न हि कल्याण-कृत् कश्चित् दुर्-गतिं तात गच्छति।। प्राप्य पुण्य-कृतां लोकान् उषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योग-भ्रष्टः अभिजायते।। अथवा योगिनाम् एव कुले भवति धीमताम्। एतद् हि दुर्-लभतरं लोके जन्म यद् ईदृशम्।। तत्र तं बुद्धि-संयोगं लभते पौर्व-देहिकम्। यतते च ततः भूयः संसिद्धौ कुरु-नन्दन।। पूर्व-अभासेन तेन एव ह्रियते हि अ-वशः अपि सः। जिज्ञासुः अपि योगस्य शब्द-ब्रह्म अतिवर्तते (*Bh. Gītā* 6.40 through 44).

[148] एषः हि एतद् हुतं अन्नं समं नयति तस्मात् एताः सप्त-अर्चिषः भवन्ति (*Praśna Up.* 3.5).

[149] तस्मात् वा एतस्मात् आत्मनः आकाशः संभूतः। आकाशात् वायुः। वायोः अग्निः। अग्नेः आपः। अद्भ्यः पृथिवी (*Taittirīya Up.* 2.1.1).

[150] सत् एव सोम्य इदम् अग्रे आसीत् एकम् एव अ-द्वितीयं।...तत् ऐक्षत बहु स्यां प्रजायेय इति तद् तेजः असृजत। तद् तेजः ऐक्षत बहु स्यां प्रजायेय इति तद् अपः असृजत। तस्मात् यत्र क्वच शोचति स्वेदते वा पुरुषः तेजसः एव तद् अधि आपः जायन्ते।। ताः आपः ऐक्षन्त बह्व्यः स्याम प्रजायेमहि इति ताः अन्नम् असृजन्त। तस्मात् यत्र क्वच वर्षति तद् एव भूयिष्ठम् अन्नं भवति अद्भ्यः एव तद् अधि अन्न-अद्यं जायते (*Chāndogya Up.* 6.2.1 and 6.2.3 and 4). पृथिव्याः ओषधयः। ओषधीभ्यः अन्नम्। अन्नात् पुरुषः। सः वै एषः पुरुषः अन्न-रसमयः (*Taittirīya Up.* 2.1.1). एतावत् वै इदं सर्वम् अन्नं च एव अन्नादः च (*Bṛhad-āraṇyaka Up.* 1.4.6).

151 सा इयं देवता ऐक्षत हन्त अहम् इमाः तिस्रः देवताः अनेन जीवेन आत्मना अनुप्रविश्य नाम-रूपे व्याकरवाणि इति।। तासां (तेजस्-अप्-अन्न-देवतासां) त्रि-वृतं त्रि-वृतम् एक-एकां करवाणि इति सा इयं देवता इमाः तिस्रः देवताः अनेन एव जीवेन आत्मना अनुप्रविश्य नाम-रूपे व्याकरोत्।।…यद् अग्ने रोहितं रूपं तेजसः तद् रूपं, यद् शुक्लं तद् अपां, यद् कृष्णं तद् अन्नस्य -- अपागात् अग्नेः अग्नित्वं वाचा-आरम्भणं विकारः नामधेयं त्रीणि रूपाणि इति एव सत्यम् (*Chāndogya Up.* 6.3.2 and 3, and 6.4.1).

153 ते सर्व-गं सर्वतः प्राप्य धीराः युक्त-आत्मानः सवम् एव आविश्यन्ति (*Muṇḍaka Up.* 3.2.5).

154 विकरोति अ-परान् भावान् अन्तश्-चित्ते व्यवस्थितान्। नियतान् च बहिश्-चित्ते एवं कल्पयते प्रभुः।। चित्त-कालाः हि ये अन्तः तु द्वय-कालाः च ये बहिः। कल्पिताः एव ते सर्वे विशेषः न अन्य-हेतुकः।। अ-व्यक्ताः एव ये अन्तः तु स्फुटाः एव च ये बहिः। कल्पिताः एव ते सर्वे विशेषः तु इन्द्रिय-अन्तरे (*Māṇḍūkya Up. Kārikā* 2.13 through 15).

155 सः यः च अयं पुरुषे। यः च असौ आदित्ये। सः एकः।। सः यः एवं-वित्। अस्मात् लोकात् प्रेत्य। एतम् अन्नम् अयम् आत्मानम् उपसंक्रम्य। एतं प्राणम् अयम् आत्मानम् उपसंक्रम्य। एतं मनोमयम् आत्मानम् उपसंक्रम्य। एतं विज्ञानमयम् अयम् आत्मानम् उपसंक्रम्य। एतं आनन्दमयम् आत्मानम् उपसंक्रम्य। इमां लोकान् काम-अन्नी काम-रूपी अनुसंचरन्। एतत् साम गायन् आस्ते। हा वु हा वु हा वु।। अहम् अन्नम् अहम् अन्नम् अहम् अन्नम्। अहम् अन्नादः अहम् अन्नादः अहम् अन्नादः (*Taittirīya Up.* 3.10.4 through 6).

156 यद् अर्चिमत् यद् अणुभ्यः अणु च यस्मिन् लोकाः निहिताः लोकिनः च। तद् एतद् अ-क्षरं ब्रह्म (*Muṇḍaka Up.* 2.2.2).

157 अणोः अणीयान् महतः महीयान् आत्मा अस्य जन्तोः निहितः गुहायाम् (*Kaṭha Up.* 1.2.20).

158 मयि सर्वम् इदं प्रोतं सूत्रे मणि-गणाः इव (*Bh. Gītā* 7.7). हन्त ते कथयिष्यामि दिव्याः हि आत्म-विभूतयः। प्राधान्यतः कुरु-श्रेष्ठ न अस्ति अन्तः विस्तरस्य मे…यद् यद् विभूतिमत् सत्त्वं श्रीमत् ऊर्जितम् एव वा। तद् तद् एव अवगच्छ त्वं मम तेजस्-अंश-सम्भवम् (*Bh. Gītā* 10.19 and 41).

159 यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति। सर्व-भूतेषु च आत्मानं (*Īśā Up.* 6). येन भूतानि अ-शेषेण द्रक्ष्यसि आत्मनि अथ उ मयि (*Bh. Gītā* 4.35).

160 न एनं छिन्दन्ति शस्त्राणि न एनं दहति पावकः। न च एनं क्लेदयन्ति आपः न शोषयति मारुतः (*Bh. Gītā* 2.23). अहम् आत्मा गुडाका-ईश सर्व-भूत-आशय-स्थितः। अहम् आदिः च मध्यं च भूतानाम् अन्तः एव च (*Bh. Gītā* 10.20). न अन्तः अस्ति मम दिव्यानां विभूतीनाम् (*Bh. Gītā* 10.40). कार्यम् इति एव यद् कर्म नियतं क्रियते अर्जुन। सङ्गं त्यक्त्वा फलं च एव सः त्यागः सात्विकः मतः (*Bh. Gītā* 18.9).

161 यथा आदर्शे तथा आत्मनि (=बुद्धौ) यथा स्वप्ने तथा पितृ-लोके। यथा अप्सु परि इव ददृशे तथा गन्धर्व-लोके (एवं च लोक-अन्तरेषु अपि -- *Śāṅkara Bhāṣya*) (*Kaṭha Up.* 2.3.5).

162 कर्म-इन्द्रियणि संयम्य यः आस्ते मनसा स्मरन्। इन्द्रिय-अर्थान् विमूढ-आत्मा मिथ्या-आचारः सः उच्यते।। यः तु इन्द्रियाणि मनसा नियम्य आरभते अर्जुन। कर्म-इन्द्रियैः कर्म-योगम् अ-सक्तः सः विशिष्यते (*Bh. Gītā* 3.6 and 7). इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परं मनः। मनसः तु परा बुद्धिः यः बुद्धेः परतः तु सः।। एवं बुद्धेः परं बुद्धा संस्तभ्य आत्मानम् आत्मना (=संस्कृतेन मनसा -- *Śānkara Bhāṣya*)। जहि शत्रुं महा-बाहो काम-रूपं दुर्-आसदम् (*Bh. Gītā* 3.42 and 43).

163 ते ध्यान-योग-अनुगताः अपश्यन् देव-आत्म-शक्तिं स्व-गुणैः निगूढाम्। यः कारणानि निखिलानि तानि काल-आत्म-युक्तानि अधितिष्ठति एकः (*Śvetāśvatara Up.* 1.3). यः योनिं योनिम् अधितिष्ठति एकः यस्मिन् इदं सं च वि च एति सर्वम्। तम् ईशानं वर-दं देवम् ईड्यं निचाय्य इमां शान्तिम् अत्यन्तम् एति (*Śvetāśvatara Up.* 4.11). सर्वाः दिशः ऊर्ध्वम् अधः च तिर्यक् प्रकाशयन् भ्राजते यद् उ अनड्वान्। एवं सः देवः भगवान् वरेण्यः योनि-स्वभावान् अधितिष्ठति एकः।। यद् च स्वभावं पचति विश्व-योनिः पाच्यान् च सर्वान् परिणामयेत् यः। सर्वम् एतद् विश्वम् अधितिष्ठति एकः गुणान् च सर्वान् विनियोजयेत् यः (*Śvetāśvatara Up.* 5.4 and 5). ज्ञानं ज्ञेयं ज्ञान-गम्यं हृदि सर्वस्य विष्ठितम् (*Bh. Gītā* 13.17).

164 अथ अतः आत्म-आदेशः एव आत्मा एव अधस्तात् आत्मा उपरिष्टात् आत्मा पश्चात् आत्मा पुरस्तात् आत्मा दक्षिणतः आत्मा उत्तरतः आत्मा एव इदं सर्वम् इति। सः वै एषः एवं पश्यन् एवं मन्वानः एवं विजानन् आत्म-रतिः आत्म-क्रीडः आत्म-मिथुनः आत्म-आनन्दः सः स्वराट् भवति तस्य सर्वेषु लोकेषु काम-चारः भवति। अथ ये अन्यथा अतः विदुः अन्य-राजानः ते क्षय्य-लोकाः भवन्ति तेषां सर्वेषु लोकेषु अ-काम-चारः भवति (*Chāndogya Up.* 7.25.2).

165 श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च। अधिष्ठाय मनश् च अयं (ईश्वरः जीव-भूतः) विषयान् उपसेवते (*Bh. Gītā* 15.9).

166 यः तु आत्म-रतिः एव स्याद् आत्म-तृप्तः च मानवः।…न च अस्य सर्व-भूतेषु कश्चिद् अर्थ-व्यपाश्रयः (*Bh. Gītā* 3.17 and 18).

[168] श्वस्-भावाः मर्त्यस्य यद् अन्तक (हे मृत्यो) एतद् सर्व-इन्द्रियाणां जरयन्ति तेजः। अपि सर्वं जीवितम् अल्पम् एव तव एव वाहाः तव नृत्य-गीते।। न वित्तेन तर्पणीयः मनुष्यः लप्स्यामहे वित्तम् अद्राक्ष्म चेद् त्वा। जीवष्यामः यावत् ईशिष्यसि त्वं वरः तु मे वरणीयः सः एव (*Kaṭha Up.* 1.1.26 and 27).

[169] समः शत्रौ च मित्रे च तथा मान-अपमानयोः। शीत-उष्ण-सुख-दुःखेषु समः सङ्ग-विवर्जितः।। तुल्य-निन्दा-स्तुतिः मौनी सन्तुष्टः येन केनचित्। अ-निकेतः स्थिर-मतिः भक्तिमान् मे प्रियः नरः (*Bh. Gītā* 12.18 and 19).

[170] अ-भयं, सत्त्व-संशुद्धिः, ज्ञान-योग-व्यवस्थितिः। दानं, दमः च, यज्ञः च, स्व-अध्यायः, तपः, आर्जवम्।। अ-हिंसा, सत्यम्, अ-क्रोधः, त्यागः, शान्तिः, अ-पैशुनम्। दया भूतेषु, अ-लोलुप्त्वं, मार्दवं, ह्रीः, अ-चापलम्।। तेजः, क्षमा, धृतिः, शौचम्, अ-द्रोहः, न-अतिमानिता। भवन्ति सम्पदं दैवीम् अभिजातस्य भारत (*Bh. Gītā* 16.1 through 3).

[171] न जायते म्रियते वा विपश्चित् न अयं कुतश्चित् न बभूव कश्चित्। अ-जः नित्यं शाश्वतः अयं पुराणः न हन्यते हन्यमाने शरीरे (*Kaṭha Up.* 1.2.18). नित्यः अ-नित्यानां चेतनः चेतनानाम् (*Kaṭha Up.* 2.2.13).

[172] गुणान् एतान् अतीत्य त्रीन् देही देह-समुद्भवान्। जन्म-मृत्यु-जरा-दुःखैः विमुक्तः अ-मृतम् अश्नुते (*Bh. Gītā* 14.20).

[173] आत्मा एव इदम् अग्रे आसीत्।…तद् ह इदं (जगद्) तर्हि अ-व्याकृतम् आसीत्, तद् नाम-रूपाभ्याम् एव व्याक्रियत, असौ नाम अयम् इदं रूपः इति। तद् इदम् अपि एतर्हि नाम-रूपाभ्याम् एव व्याक्रियते, असौ नाम अयम् इदं रूपः इति। सः एषः (आत्मा) इह प्रविष्टः आ नख-अग्रेभ्यः, यथा क्षुरः क्षुर-धाने अवहितः स्यात्, विश्वं-भरः वा विश्वं-भर-कुलाये, तं न पश्यन्ति। अ-कृत्स्नः हि सः, प्राणन् एव प्राणः नाम भवति, वदन् वाक्, पश्यन् चक्षुः, शृण्वन् श्रोत्रम्, मन्वानः मनः, तान् अस्य एतानि कर्म-नामानि एव। सः यः अतः एक-एकम् उपास्ते न सः वेद, अ-कृत्स्नः हि एषः अतः एक-एकेन भवति। आत्मा इति एव उपासीत, अत्र हि एते सर्वे एकं भवन्ति। तद् एतत् पदनीयम्, अस्य सर्वस्य यद् अयम् आत्मा, अनेन हि एतत् सर्वं वेद (*Bṛhad-āraṇyaka Up.* 1.4.1 and 7).

[174] मद्-स्थानि सर्व-भूतानि न च अहं तेषु अवस्थितः।। न च मद्-स्थानि भूतानि पश्य मे योगम् ऐश्वर्यम्। भूत-भृत् न च भूत-स्थः मम आत्त्मा भूत-भावनः (*Bh. Gītā* 9.4 and 5).

[176] इह एव तैः जितः सर्गः येषां साम्ये स्थितं मनः। निर्-दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः (*Bh. Gītā* 5.19). सुहृत्-मित्र-अरि-उदासीन-मध्यस्थ-द्वेष्य-बन्धुषु। साधुषु अपि पापेषु सम-बुद्धिः विशिष्यते (*Bh. Gītā* 6.9). सर्व-भूत-स्थम् आत्मानं सर्व-भूतानि च आत्मनि। ईक्षते योग-युक्त-आत्मा सर्वत्र सम-दर्शनः।। यः मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्य अहं न प्रणश्यामि सः च मे न प्रणश्यति।। सर्व-भूत-स्थितं यः मां भजति एकत्वम् आस्थितः। सर्वथा वर्तमानः अपि सः योगी मयि वर्तते (*Bh. Gītā* 6.29 through 31).

[177] सः अहं भगवः मन्त्र-विद् एव अस्मि, न आत्म-विद्, श्रुतं हि एव मे भगवत्-दृशेभ्यः 'तरति शोकम् आत्म-विद्' इति, सः अहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु इति, तं ह उवाच -- यद् वै किञ्च एतद् अध्यगीष्ठा नाम एव एतत् (*Chāndogya Up.* 7.1.3). रुद्रः तारकं ब्रह्म व्याचष्टे येन असौ अ-मृतीभूत्वा मोक्षीभवति (*Jābāla Up.* 1.1).

[178] तद् एषः श्लोकः -- न पश्यः मृत्युं पश्यति, न रोगं, न उत दुःखतां, सर्वं ह पश्यः पश्यति, सर्वम् आप्नोति सर्वशः इति (*Chāndogya Up.* 7.26.2).

[179] बुद्धिः बुद्धिमताम् अस्मि (*Bh. Gītā* 7.10). इन्द्रियाणां मनस् च अस्मि (*Bh. Gītā* 10.22). सत्त्वं सत्त्ववताम् अहम् (*Bh. Gītā* 10.36). अहं कृत्स्नस्य जगतः प्रभवः प्रलयः तथा (*Bh. Gītā* 7.6).

[180] तद् त्वम् एव त्वम् एव तद् (*Kaivalya Up.* 16).

[181] अ-यतिः श्रद्धया उपेतः योगात् चलत-मानसः। अ-प्राप्य योग-संसिद्धिं कां गतिं कृष्ण गच्छति॥ कच्चित् न उभय-विभ्रष्टः छीन्न-अभ्रम् इव नश्यति। अ-प्रतिष्ठः महा-बाहो विमूढः ब्रह्मणः पथि॥ …पार्थ, न एव इह न अमुत्र विनाशः तस्य विद्यते। न हि कल्यान-कृत् कश्चित् दुर्-गतिं तात गच्छति (*Bh. Gītā* 6.37, 38, and 40).

# Chapter 4

[182] यज्ञ-शिष्ट-अशिनः सन्तः मुच्यन्ते सर्व-किल्बिषैः (*Bh. Gītā* 3.13). अपरे नियत-आहाराः प्राणान् प्राणेषु जुह्वति (*Bh. Gītā* 4.30). युक्त-आहार-विहारस्य युक्त-चेष्टस्य कर्मसु। युक्त-स्वप्न-अवबोधस्य योगः भवति दुःख-हा (*Bh. Gītā* 6.17). स्वधा अहम्, अहम् औषधम् (*Bh. Gītā* 9.16). गाम् आविश्य च भूतानि धारयामि अहम् ओजसा। पुष्णामि च ओषधीः सर्वाः सोमः भूत्वा रस-आत्मकः।। अहं वैश्वा-नरः भूत्वा प्राणिनां देह-आश्रितः। प्राण-अपान-समायुक्तः पचामि अन्नं चतुर्-विधम्।। सर्वस्य च अहं हृदि सन्निविष्टः (*Bh. Gītā* 15.13 through 15). आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीति-विवर्धनाः। रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विक-प्रियाः (*Bh. Gītā* 17.8).

[183] कर्मणि एव अधिकारः ते मा फलेषु कदाचन। मा कर्म-फल-हेतुः भूः मा ते सङ्गः अस्तु अ-कर्मणि।। योग-स्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनं-जय। सिद्धि-अ-सिद्ध्योः समः भूत्वा समत्वं योगः उच्यते (*Bh. Gītā* 2.47 and 48).

[184] अन्-आदित्वात् निर्-गुणत्वात् परम-आत्मा अयम् अ-व्ययः। शरीर-स्थः अपि कौन्तेय न करोति न लिप्यते (*Bh. Gītā* 13.31).

[185] योगः कर्मसु कौशलम् (*Bh. Gītā* 2.50).

[186] प्रकृति एव च कर्माणि क्रियमाणानि सर्वशः। यः पश्यति तथा आत्मानम् अ-कर्तारं सः पश्यति (*Bh. Gītā* 13.29). क्षेत्र-क्षेत्रज्ञयोः (=प्रकृति-पुरुषयोः) एवम् अन्तरं (=भेदं) ज्ञान-चक्षुषा। भूत-प्रकृति-मोक्षं च ये विदुः यान्ति ते परम् (*Bh. Gītā* 13.34).

[187] ईश्वरः सर्व-भूतानां हृद्-देशे अर्जुन तिष्ठति। भ्रामयन् सर्व-भूतानि यन्त्र-आरूढानि मायया (*Bh. Gītā* 18.61).

[188] सर्व-धर्मान् परित्यज्य माम् एकं शरणं व्रज (*Bh. Gītā* 18.66).

[189] सर्व-भूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्प-क्षये पुनः तानि कल्प-आदौ विसृजामि अहम् (*Bh. Gītā* 9.7).

[190] त्रिविधं नरकस्य इदं द्वारं नाशनम् आत्मनः। कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयं त्यजेत् (*Bh. Gītā* 16.21).

[191] यथा सोम्य मधु मधु-कृतः निस्तिष्ठन्ति नाना-अत्ययानां वृक्षाणां रसान् समवहारम् एकतां रसं गमयन्ति।। ते यथा तत्र न विवेकं लभन्ते अमुष्य अहं वृक्षस्य रसः अस्मि अमुष्य अहं वृक्षस्य रसः अस्मि इति एवं एव खलु सोम्य इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति।। ते इह व्याघ्रः वा सिंहः वा वृकः वा वराहः वा कीटः वा पतङ्गः वा दंशः वा मशकः वा यद् यद् भवन्ति तद् आभवन्ति (*Chāndogya Up.* 6.9.1 through 3).

[192] कर्मणि एव अधिकारः ते मा फलेषु कदाचन। मा कर्म-फल-हेतुः भूः (*Bh. Gītā* 2.47). कर्म-जं बुद्धि-युक्ताः हि फलं त्यक्त्वा मनीषिनः (*Bh. Gītā* 2.51). यदा ते मोह-कलिलं बुद्धिः व्यतितरिष्यति। तदा गन्तासि निर्-वेदं श्रोतव्यस्य श्रुतस्य च।। श्रुति-विप्रतिपन्नाः ते यदा स्थास्यति निश्चलाः। समाधौ (=आत्मणि) अवचलाः बुद्धिः (*Bh. Gītā* 2.52 and 53). मयि सर्वाणि कर्माणि सन्न्यस्य अधि-आत्म-चेतसा। निर्-आशीः निर्-ममः भूत्वा (*Bh. Gītā* 3.30). बाह्य-स्पर्शेषु अ-सक्त-आत्मा विन्दति आत्मनि यद् सुखम्। सः ब्रह्म-योग-युक्त-आत्मा सुखम् अ-क्षयम् अश्नुते (*Bh. Gītā* 5.21).

[193] न अ-सतः विद्यते भावः न अ-भावः विद्यते सतः (*Bh. Gītā* 2.16).

[194] सत् एव सोम्य इदम् अग्रे आसीत् एकम् एव अ-द्वितीयं। तद् (=तत्र) ह एके आहुः अ-सत् एव इदम् अग्रे आसीत् एकम् एव अ-द्वितीयं, तस्मात् अ-सतः सत् जायत (=अजायत)।। कुतः तु खलु सोम्य एवं स्यात् इति ह उवाच, कथम् अ-सतः सत् जायेत इति। सत् तु एव सोम्य इदम् अग्रे आसीत् एकम् एव अ-द्वितीयम् (*Chāndogya Up.* 6.2.1 and 2).

[195] अथ यद् इदम् अस्मिन् ब्रह्म-पुरे दहरं पुण्डरीकं वेश्म दहरः अस्मिन् अन्तर्-आकाशः तस्मिन् यद् अन्तः तद् अन्वेष्टव्यं तद् वाव विजिज्ञासितव्यम् इति।। तं चेत् ब्रूयुः यद् इदम् अस्मिन् ब्रह्म-पुरे दहरं पुण्डरीकं वेश्म दहरः अस्मिन् अन्तर्-आकाशः किं तद् अत्र विद्यते यद् अन्वेष्टव्यं यद् वाव विजिज्ञासितव्यम् इति सः ब्रुयात्।। यावान् वै अयम् आकाशः तावान् एषः अन्तर्-हृदये आकाशः उभे अस्मिन् द्यावा-पृथिवी अन्तः एव समाहिते उभौ अग्निः च वायुः च सूर्या-चन्द्रमसौ उभौ विद्युत् अक्षत्राणि यद् च अस्य इह अस्ति यद् च न अस्ति सर्वं तद् अस्मिन् समाहितम् इति (*Chāndogya Up.* 8.1.1 through 3).

[196] द्वितीयात् वै भयं भवति (*Bṛhad-āraṇyaka Up.* 1.4.2). असद् (=अ-विकृतं ब्रह्म) वै इदम् अग्रे आसीत्। ततः वै सद् (=विकृतं ब्रह्म) अजायत। तद् आत्मानः स्वयम् अकुरुत। तस्मात् तद् सुकृतम् उच्यते इति। -- यद् वै तद् सुकृतम्। रसः वै सः। रसं हि अयं लब्ध्वा आनन्दी भवति। कः हि एव अन्यात् कः प्राण्यात्। यद् एषः आकाशः आनन्दः न स्यात्। एषः हि एव आनन्दयाति। यदा हि एव एषः एतस्मिन् अ-दृश्ये अन्-आत्म्ये अ-निरुक्ते अ-निलयने अ-भयं प्रतिष्ठां विन्दते। अथ सः अ-भयं गतः भवति। यदा हि एव एषः एतस्मिन् उत् (=अपि) अरम् (=अल्पम्) अन्तरं कुरुते। अथ तस्य भयं भवति। तद् तु एव भयं विदुषः अ-मन्वानस्य (*Taittirīya Up.* 2.7.1).

[197] अस्य महतः भूतस्य निःश्वसितम् एतद् यद् ऋग्-वेदः यजुर्-वेदः साम-वेदः अथर्व-अङ्गिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि इष्टं हुताशितं पायितम् अयं च लोकः परः च लोकः, सर्वाणि च भूतानि अस्य एव एतानि सर्वाणि निःश्वसितानि (*Bṛhad-āraṇyaka Up.* 4.5.11).

[199] कामैः तैः तैः हृत-ज्ञानाः प्रपद्यन्ते अन्य-देवताः। तं तं नियमम् आस्थाय प्रकृत्या नियताः स्वया।। यः यः यां यां तनुं भक्तः श्रद्धया अर्चितुम् इच्छति। तस्य तस्य अ-चलां श्रद्धां ताम् एव विदधामि अहम्।। सः तया श्रद्धया युक्तः तस्याः (देवतायाः) राधनम् ईहते। लभते च ततः कामान् मया एव विहितान् हि तान् (*Bh. Gītā* 7.20 through 22).

[200] एकः देवः सर्व-भूतेषु गूढः सर्व-व्यापी सर्व-भूत-अन्तर-आत्मा। कर्म-अध्यक्षः सर्व-भूत-अधिवासः साक्षी चेता केवलः निर्गुणः च (*Śvetāśvatara Up.* 6.11). अन्-आदित्वात् निर्-गुणत्वात् परम-आत्मा अयम् अ-व्ययः। शरीर-स्थः अपि कौन्तेय न करोति न लिप्यते (*Bh. Gītā* 13.31).

[201] महान् प्रभुः वै पुरुषः सत्त्वस्य एषः प्रवर्तकः (*Śvetāśvatara Up.* 3.12). गतिः भर्ता प्रभुः साक्षी (*Bh. Gītā* 9.18).

[202] सत्यं ज्ञानम् अन्-अन्तं ब्रह्म (*Taittirīya Up.* 2.1.1).

[203] द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्म-विदः वदन्ति परा च एव अ-परा च (*Muṇḍaka Up.* 1.1.4).

[204] ज्ञानं ज्ञानवताम् अहम् (*Bh. Gītā* 10.38).

[205] प्रतिबोध-विदितं मतम् अ-मृतत्वं हि विन्दते (*Kena Up.* 2.4).

[206] जाग्रत्-स्वप्न-सुषुप्ति-आदि-प्रपञ्चं यद् प्रकासते। तद् ब्रह्म अहम् इति ज्ञात्वा सर्व-बन्धैः प्रमुच्यते।। त्रिष् धामसु यद् भोग्यं भोक्ता भोगः च यद् भवेत्। तेभ्यः वि-लक्षणः साक्षी चिन्मात्रः अहं सदा शिवः।। मयि एव स-कलं जातं मयि सर्वं प्रतिष्ठितम्। मयि सर्वं लयं याति तद् ब्रह्म अ-द्वयम् अस्मि अहम्।। अणोः अणीयान् अहम् एव तद्वत् महान् अहं विश्वम् अहं विचित्रम्। पुरातनः अहं पुरुषः अहम् ईशः हिरण्यमयः अहं शिव-रूपम् अस्मि (*Kaivalya Up.* 17 through 20).

[207] सर्व-कर्माणि अपि सदा कुर्वाणः मद्-व्यपाश्राः। मद्-प्रसादात् अवाप्नोति शाश्वतं पदम् अ-व्ययम्।।…तम् एव शरणं गच्छ सर्व-भावेन भारत। तद्-प्रसादात् परां शान्तिं स्थानं प्राप्स्यति शाश्वतम् (*Bh. Gītā* 18.56 and 62).

[208] ब्रह्म एव तेन गन्तव्यं ब्रह्म-कर्म-समाधिना (*Bh. Gītā* 4.24).

[209] यदा स्थास्यति निश्चला। समाधौ अ-चला बुद्धिः तदा योगम् अवोप्स्यति (*Bh. Gītā* 2.53).

[210] भोग-ऐश्वर्य-प्रसक्तानां तया अपहृत-चेतसां। व्यवसाय-आत्मिका बुद्धिः समादौ न विधीयते (*Bh. Gītā* 2.44).

[211] न एव किञ्चिद् करोमि इति युक्तः मन्येत तत्त्व-विद्। पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन्।। प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रिय-अर्थेषु वर्तन्ते इति धारयन् (*Bh. Gītā* 5.8 and 9).

212 तत्त्व-विद् तु महा-बाहो गुण-कर्म-विभागयोः। गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते (*Bh. Gītā* 3.28). ब्रह्मणि आधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न सः पापेन पद्म-पत्रम् इव अम्भसा (*Bh. Gītā* 5.10). न च मां तानि कर्माणि निबध्नन्ति धनञ्जय। उदासीनवत् आसीनम् अ-सक्तं तेषु कर्मसु (*Bh. Gītā* 9.9). यः एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह। सर्वथा वर्तमानः अपि न सः भूयः अभिजायते (*Bh. Gītā* 13.23). न अन्यं गुणेभ्यः कर्तारं यदा द्रष्टा अनुपशति। गुणेभ्यः च परं वेत्ति मद्-भावं सः अधिगच्छति (*Bh. Gītā* 14.19).

213 अनेन ज्ञानम् आप्नोति संसार-अर्णव-नाशनम्। तस्मात् एवं विदित्वा एनं कैवल्यं पदम् अश्नुते, कैवल्यं पदम् अश्नुते (*Kaivalya Up.* 24).

# About the Author



Photo by Cassia Reis, GayatriYoga.eu

A.K. Aruna started his studies in Advaita Vedanta and the Sanskrit language in 1976 at an intensive three-year program in a traditional gurukulam, outside Bombay, India, under Shri Pujya Swami Dayananda Saraswati, the most renowned Sanskrit and Advaita Vedanta scholar of the past century. Stepping outside his academic background in Western philosophy, Aruna immersed himself in the deepest, oldest spiritual tradition in the world. This detailed study opened his eyes. In this ancient teaching, Aruna found a complete merging of the intellect and heart. From that point on, he dedicated his life to the inclusive vision of Vedanta.

Returning to his native United States, Aruna earned a master's degree in South Asian languages and literature from the University of Washington. Aruna later studied computer languages, becoming a programmer and manager of information technology in San Diego, California. Retiring to India in 2000, Aruna dedicated himself to studies in Advaita Vedanta and the Sanskrit Language. He created a set of tools for those students interested in a thorough study of Sanskrit to better understand the Bhagavad Gita. These tools consist of a five-book set under the title, *The Aruna Sanskrit Language Series*. They are: *The Aruna Sanskrit Grammar Reference*; *The Aruna Sanskrit Grammar Coursebook: 64 Lessons Based on the Bhagavad Gita*; *The Bhagavad Gita Dictionary*; *The Bhagavad Gita Reader: Sanskrit/English Parallel Text*; and *The Bhagavad Gita Sanskrit Key: Verse-by-Verse Grammar & Vocabulary*. Additionally, there is now a reading and pronunciation guide, *The Sanskrit Reading Tutor: Read It, Click It, Hear It!* Using these tools, Aruna has been teaching Sanskrit at the Arsha Vidya Gurukulams in both South India and in the U.S.

Aruna has lived and studied in a traditional teaching gurukulam for over nine years in India and two years in the U.S. Wishing to help yoga students ground the traditional purpose of yoga in the revered scriptures of India, Aruna releases *Patanjali Yoga Sutras: Translation and Commentary in the Light of Vedanta Scripture*. This presents the yoga discipline as its practitioners in the ancient scriptures understood and practiced.